श्री हरि स्तोत्रं

श्री हरि स्तोत्रं

जगज्जालपालं कचत्कंठमालं
शरच्चंद्रफालं महादैत्यकालं |
नभो नीलकायं दुरावारमायं
सुपद्मासहायं भजेऽहं भजेऽहं || 1 ||

सदांभोधिवासं गलत्पुष्पहासं
जगत्सन्निवासं शतादित्यभासं |
गदाचक्रशस्त्रं लसत्पीतवस्त्रं
हसच्चारुवक्त्रं भजेऽहं भजेऽहं || 2 ||

रमाकंठहारं श्रुतिव्रातसारं
जलांतर्विहारं धराभारहारं |
चिदानंदरूपं मनोहारिरूपं
धृतानेकरूपं भजेऽहं भजेऽहं || 3 ||

जराजन्महीनं परानंदपीनं
समाधानलीनं सदैवानवीनं |
जगज्जन्महेतुं सुरानीककेतुं
दृढं विश्वसेतुं भजेऽहं भजेऽहं || 4 ||

कृताम्नायगानं खगाधीशयानं
विमुक्तेर्निदानं हरारातिमानं |
स्वभक्तानुकूलं जगद्वृक्षमूलं
निरस्तार्तशूलं भजेऽहं भजेऽहं || 5 ||

समस्तामरेशं द्विरेफाभकेशं
जगद्बिंबलेशं हृदाकाशदेशं |
सदा दिव्यदेहं विमुक्ताखिलेहं
सुवैकुंठगेहं भजेऽहं भजेऽहं || 6 ||

सुरालीबलिष्ठं त्रिलोकीवरिष्ठं
गुरूणां गरिष्ठं स्वरूपैकनिष्ठं |
सदा युद्धधीरं महावीरवीरं
भवांभोधितीरं भजेऽहं भजेऽहं || 7 ||

रमावामभागं तलाविष्टनागं
कृताधीनयागं गतारागरागं |
मुनींद्रैः सुगीतं सुरैः संपरीतं
गुणौघैरतीतं भजेऽहं भजेऽहं || 8 ||

इदं यस्तु नित्यं समाधाय चित्तं
पठेदष्टकं कंठहारं मुरारेः |
स विष्णोर्विशोकं ध्रुवं याति लोकं
जराजन्मशोकं पुनर्विंदते नो || 9 ||

इति श्रीमत्परमहंस स्वामि ब्रह्मानंद विरचितं श्री हरि स्तोत्रं ||